# श्रीवायुमहापुराणम्

# THE VĀYUMAHĀPURĀṆAM

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली

# भूमिका

**प्रथमं सर्वशास्त्राणां पुराणं ब्रह्मणा स्मृतम् ।**

भारतवर्षस्य स्वरूपं वस्तुतोऽवगन्तुं प्राचीना ह्यस्य परम्पराः सम्यगवगाहनीयाः । परम्पराश्चैता वेदेषु पुराणेषु इतिहासग्रन्थेषु च सुतरां निर्दशिताः सन्ति । तत्रापि वेदानां प्राचीनता सर्वप्रमाणसिद्धा । वैदिकं वाङ्मयमितिहासपुराणयोः साहाय्येनैवोपबृंहणीयमिति भूयोभूयः प्रतिपादितम् ।

**इतिहासपुराणाभ्यां वेदान् समुपबृंहयेत् ।**

इतिहासवत्पुराणमपि लोकशिक्षायाः पद्धतिविशेषः । पद्धतिरियं विशालं जनसमूहं शिक्षयितुं समुदमिषत् । यज्ञादिष्ववसरेषु पर्वसु तीर्थेषु वा स्वतः समुपस्थितं जनसमूहमुपदेष्टुमृषिभिरियं प्रणाली विकासिता । पुराणानां माध्यमेनाध्यात्मिकं वैज्ञानिकं च चिन्तनं सरलतया जनसामान्यं यावत् प्राप्यन्तिस्म मनीषिणः । निखिलमपि समाजं शिक्षयितुमियं प्रणाली अतीव प्राभाविकी याता । एवं विद्यालयादिस्थापनमन्तरेव पुराणद्वारा लोकशिक्षणस्य स्थायी परम्परा स्थापिता । सा खलु युगेऽस्मिन् क्रमशः क्षीयत इत्युनुभूयते ।

पुराणेषु वर्णितानां घटनानां च सत्यासत्याविचारोऽनर्थकः, यतस्तेषां तत्र गौणता भवति । प्रतिपाद्यविषय एव मुख्यः । तमेव विषयं हृदयङ्गमयितुं विविधरयं पुराणस्योन्मिषितः । अत एवात्र परवर्तिनामपि जनानां क्वचिदुल्लेखः प्राप्यते । अपरत्र क्वचित् कल्पितानामपि कथानामुपवर्णनं प्राप्यते । पशूनां पक्षिणामपि तत्र जीवनं क्वचित् चित्रितं दृश्यते । अतः भावरूपेणैव सत्यता पुराणानामपेक्ष्यते न तु विषयरूपेण । अत एव पुरापि नवमिति पुराणस्य व्युत्पत्तिः संगच्छते ।

पुराणानां वर्ण्यविषयः सर्गप्रतिसर्गौ वंशो मन्वन्तराणि वंशानुचरितमिति पञ्चात्मकः प्रसिद्धः । प्रतिपाद्यं तु तेषां सर्वेषामध्यात्ममेव । निखिलमिदं जगत् परात्पररूपस्य परमेश्वरस्यैव स्थूलं शरीरम् । सर्वेष्वपि प्राणिषु चैतन्यं यदनुभूयते तत्तस्यैवाखिलब्रह्माण्डव्यापिनः परमात्मनः स्वरूपम् । मनुष्यैरेव केवलैः शक्यते साक्षात्कर्तुं तत् । तदर्थमेव वेदानामवगमः पुराणानां च प्रादुर्भावः सञ्जातः ।

पुराणानामाविर्भावस्तु वस्तुतः केनापि देवताविशेषेणैव कृतः कस्मिन्नपि प्रसङ्गविशेषे । महर्षिणा व्यासेन तु तेषां सम्पादनं कृतम् । अतएव स पुराणानां कर्ता रचयिता वा कथ्यते—

**अष्टादश पुराणानां कर्ता सत्यवती सुतः ।**

महर्षेरस्य नामास्ति कृष्णद्वैपायनः । तस्यैव आख्या व्यास इति वेदानां चतुर्धा विभाजनात् जाता । व्यासेन चतुर्भ्यः शिष्येभ्यः वेदा उपदिष्टाः पैलादिभ्यः । सूताय लोहर्षाय पुराणानि वर्णितानि । व्यासशिष्यात् लोमहर्षणात् सूतात् नैमिषारण्ये शौनकादयो महर्षयो मुनयश्च पुराणानि जगृहुः । कदाचित् तस्य सूतस्य पुत्रः सौतिरपि पितुः सकाशादधिगृह्य पुराणविद्यामृषिभ्यो ग्राहयामास । अनन्तरं पौराणिकैरनेकैर्व्यासैः पुराणविद्येयं भारते निखिले प्रसारमवाप । अतोऽद्यावधि पौराणिका व्यासपदेनाभिनन्द्यन्ते ।

मन्वन्तरेषु सर्वेषां निमित्तानि भवन्ति हि ॥ २२ ॥ ज्योत्स्ना रात्र्यहनी सन्ध्या चत्वार्यांभासितानि वै । भान्ति यस्मात्ततो भासि भाशब्दोऽयं मनी
षिभिः । व्याप्तिदीप्त्यां निगदितः पुनश्चाह प्रजापतिः ॥ २३ ॥ सोऽम्भांस्येतानि दृष्ट्वा तु देवदानवमानवान् । पितॄंश्च वासृजत्सोऽन्यानात्मनो
विबुधान् पुनः ॥ २४ ॥ तामुत्कृत्य तनुं कृत्स्नान्ततोऽन्यामसृजत् प्रभुः । मूर्तिं रजस्तमःप्रायां पुनरेवाभ्ययूयुजत् ॥ २५ ॥ अन्धकारे क्षुधाविष्ट
स्ततोऽन्यां सृजते पुनः । तेन सृष्टाः क्षुधात्मानस्तेऽम्भांस्यादातुमुद्यताः ॥ २६ ॥ अम्भांस्येतानि रक्षाम उक्तवन्तश्च तेषु च । राक्षसास्ते स्मृता
लोके क्रोधात्मानो निशाचराः ॥ २७ ॥ येऽब्रुवन् क्षिणुमोऽम्भांसि तेषां हृष्टाः परस्परम् । तेन ते कर्मणा यक्षा गुह्यकाः क्रूरकर्मिणः ॥ २८ ॥
रक्षणे पालने चापि धातुरेष विभाव्यते । य एष क्षितिधातुर्वै क्षयणे सन्निरुच्यते ॥ २९ ॥ तान्दृष्ट्वा ह्यप्रियेणास्य केशा अशीर्यंत धीमतः । शीतो
ष्णाद्योच्छ्रिता ह्यूर्द्ध्वं तदारोहन्त तं प्रभुम् ॥ ३० ॥ हीना मच्छिरसो व्याला यस्माच्चैवापसर्पिताः । व्यालात्मानः स्मृता व्यालाद्धीनत्वादहयः स्मृताः
॥ ३१ ॥ पन्नत्वात्पन्नगाश्चैव सर्पाश्चैवापसर्पिणः । तेषां पृथिव्यां निलयाः सूर्याचन्द्रमसोरधः ॥ ३२ ॥ तस्य क्रोधोद्भवो योऽसावग्निगर्भस्सुदारुणः ।
स तु सर्पसहोत्पन्नानाविवेश विषात्मिकान् ॥ ३३ ॥ सर्पान् दृष्ट्वा ततः क्रोधात् क्रोधात्मानो विनिर्ममे । वर्णेन कपिशेनोग्रास्ते भूताः पिशिताश
नाः ॥ ३४ ॥ भूतत्वात्ते स्मृता भूताः पिशाचाः पिशिताशनात् । वयतो गास्ततस्तस्य गन्धर्वा जज्ञिरे तदा ॥ ३५ ॥ ध्यायतीत्येष धातुर्वै मात्रार्थे
परिपठ्यते । पिबतो जज्ञिरे गास्तु गंधर्वास्तेन ते स्मृताः ॥ ३६ ॥ अष्टास्वेतासु सृष्टासु देवयोनिषु स प्रभुः । ततः स्वच्छन्दतोऽन्यानि वयांसि वय
सोऽसृजत् ॥ ३७ ॥ छाद्यतस्तानि छन्दांसि वयसोऽपि वयांस्यपि । शून्यान् दृष्ट्वा तु देवो वैऽसृजत्पक्षिगणानपि ॥ ३८ ॥ मुखतोऽजान् ससर्जाथ
वक्षसश्च वयोऽसृजत् । गाश्चैवाथोदराद्ब्रह्मा पार्श्वाभ्याञ्च विनिर्ममे ॥ ३९ ॥ पद्भ्याञ्चाश्वान् समातङ्गान् शरभान् गवयान् मृगान् । उष्ट्रानश्वतरांश्चैव
ताश्चान्याश्चैव जातयः ॥ ४० ॥ ओषध्यः फलमूलानि रोमतस्तस्य जज्ञिरे । एवं पश्चोषधीः सृष्ट्वा न्ययुञ्जत्सोऽध्वरे प्रभुः ॥ ४१ ॥ तस्मादादौ तु
कल्पस्य त्रेतायुगमुखे तदा । गौरजः पुरुषो मेषो ह्यश्वोऽश्वतरगर्द्दभौ । एतान् ग्राम्यान् पशूनाहुरारण्यांश्च निबोधत ॥ ४२ ॥ श्वापदा द्विखुरो
हस्ती वानरः पाक्षिपञ्चमाः । उन्दकाः पशवः सृष्टाः सप्तमास्तु सरीसृपाः ॥ ४३ ॥ गायत्रं वरुणञ्चैव त्रिवृत्सौम्यं रथन्तरम् । अग्निष्टोमं च यज्ञानां
निर्ममे प्रथमान्मुखात् ॥ ४४ ॥ छन्दांसि त्रैष्टुभङ्कर्म स्तोमं पञ्चदशन्तथा । बृहत्साममथोक्थञ्च दक्षिणात्सोऽसृजन्मुखात् ॥ ४५ ॥ सामानि जगती
च्छन्दस्तोमं पञ्चदशन्तथा । वैरूप्यमतिरात्रञ्च पश्चिमादसृजन्मुखात् ॥ ४६ ॥ एकविंशमथर्वाणमाप्तोर्यामाणमेव च । आनुष्टुभं सवैराजमुत्तरादसृजन्मु